शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम

Saathi

Date ___/___/______

प्र०(1) - शकुन्तलायाः लाभे सन्दिहानो राजा किं चिन्तयति ?
उत्तरम् - शकुन्तलायाः लोकोत्तरं लावण्यं सञ्चिन्त्य तल्लाभे सन्दिहानो राजा दुष्यन्तो नर्मसचिवं विदूषकं प्रति कथयति -
अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

प्र०(2) - सुरयुवतयः कुत्र विजयम् आशंसन्ते ?
उत्तरम् - दैत्यैः बद्धवैराः सुरयुवतयः दुष्यन्तस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयं आशंसन्ते ।

प्र०(3) - 'परिहासविजल्पितं सखे' इति राजा कथं कथयति ?
उत्तरम् - शकुन्तलाविषयकमनुरागं प्रच्छादयन् तस्याः स्वाभिलाषानर्हत्वं च समर्थन राजा दुष्यन्तो विदूषकं ब्रूते -
क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥

Renu Devi
05/09/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया।

Page No. ____

उपशास्त्री-II साहित्य - तृतीय-पत्रम्
किरातार्जुनीयम्- महाकाव्यम्
प्रथमः सर्गः

Date ___/___/_____

प्र०(1) - पद्यमिदम् व्याख्येयम् ।
अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम्॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीयम् महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - यदि पराक्रमं निरस्य चिराय शान्तिरेव कल्याणसाधनम् इति मन्यसे चेत् तर्हि राजचिह्नेनानेन धनुषा किम्। एनत् परित्यज्य जटां धारयन् अस्मिन्नेव वने मुनिर्भूत्वा होमं कुरु।

व्याख्या - अथ = यदि। निरस्तविक्रमः (सन्) = उत्साहरहित होकर। चिराय = चिरकाल के लिए। क्षमाम् एव = क्षमा को ही। सुखस्य साधनं = सुख का उपाय। पर्येषि (चेत्) = समझते हो (तो) लक्ष्मीपतिलक्ष्म = भगवान (ऐश्वर्यशाली) के चिन्ह (इस)। कार्मुकं = धनुष को। विहाय = छोड़कर जटाधरः सन् = जटाधारी होकर। इह = इस वन में पावकं जुहुधि = (होम करके) अग्नि को तृप्त करें।

Renu Devi
05/09/20
राधा उमाकांत संस्कृत महावि० सुखसेना,
पूर्णिया।

Page No.

शास्त्री - II साहित्य

रघुवंश महाकाव्य

लघूत्तरीय प्रश्नोत्तराणि - त्रयोदश - चतुर्दश - सर्गयोः

प्र० (1) - लक्ष्मणस्य मुखेन श्रीरामस्य परित्यागविषयकमादेश श्रवणानन्तरं सीतायाः किमभवत् ?

उत्तरम् - ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रस्यमानाभरणप्रसूना ।
स्वमूर्तिलाभ प्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥

प्र० (2) - सीतायाः परित्याग काले लक्ष्मणः तां किमाह ?

उत्तरम् - निघ्नस्य मे देवि निदेशरौक्ष्यं क्षमस्व इत्याह लक्ष्मणः ।

प्र० (3) - वने परित्यज्यमाना सीता रामाय किं संदिदेश लक्ष्मणेन द्वारा ?

उत्तरम् - सीता प्राह यदस्यामवस्थायां मिथ्यापवादेन निर्वासिताहं स्वभाग्यस्यैव दोषं मन्ये । वनवासकाले यासां तपस्विनीनां पालनमहं स्वाश्रमे अकार्षम् सैवाऽहं तासामाश्रमे केन प्रकारेण यास्यामि ? यदि मम गर्भे तवात्मजो नो भवेत् तदा मयास्व-प्राण त्यागः कृतो भवेत् किन्तु भवत् प्रजारक्षणाय तदपि कर्तुमक्षमाऽहं संजाता । सन्तानजननानन्तरं सूर्ये दृष्टिं निवेश्याहं तथाविधं तपश्चरिष्यामि येन जन्मान्तरेऽपि भवानेव मम पतिर्भवेत्

Renu Devi
05/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।